Shree Raghunath Sanskrit Research Institute Library,
Jammu

No. ८१५ – घ

Title श्रीगंगाष्टकम्

Author

Extent १ Age

Subject स्तोत्रम्

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नं० ८१५-घ
गंगाष्टकम्
नं० ८१५-घ
पत्रम् १ (एकम्)

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ॐनमः श्रीगंगायैनमः ॥ यदवधितवनीरं पातकीनैतिगङ्गे तदवधिमलजाले
नैवमुक्तः कलौस्यात् नवजलकणिकालं पापिनां पापशुध्यै पतितपरमदीनान्
त्वंहि पासिप्रपन्नान् ॥१॥ नवशिवजललेशंवायुनीतंसमेत्य सपदिनिरयजालं शू
न्यतामेतिगंगे। समलगिरिसमूहाः प्रस्फुटंतिप्रचण्डाः त्वयिसतिविशतांनः पापश
ङ्काकुतःस्यात् ॥२॥ नवशिवजलजालंनिःसृतंयर्हिगङ्गे सकलभुवनजालं पूतपूतं
तदाभूत् । यमभटकलिवार्ता देविलुप्तायमोपि व्यधिकृतवरदेहाः पूर्णकामाः सका
माः ॥३॥ मधुमधुवनभृङ्गैर्देवभृङ्गैस्तुपूगैर् मधुमधुवनभृङ्गैर्देवभृङ्गैःसुभृङ्गैः। पुर
हरपरमाङ्गे भासिमायेवगङ्गे शमयसिविषतापं देवदेवस्यवंद्ये ॥४॥ चलितशशि
कुलाभरुत्तरङ्गैस्तरङ्गैः भ्रमितनदनदीनामंगसंगैरसङ्गैः। विहरसि जगदण्डे खंड

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

गंगा
ष्टकं
1

यंती गिरीन्द्रान् रमयसि निजकान्तं सागरं कान्तकान्ते ॥५॥ तव परिमहिमानं चि
त्तवाचाममानं हरिहरविधिशक्रा नापि गङ्गे विदन्ति । श्रुतिकुलमभियन्तं शंकितं
ते गुणान्ते गुणगणसुविलापैर् नेति नेति नेतीति सत्यं ॥६॥ तव नुति नति ना
मान्यप्यघं पावयंति ददति परमशांतिं दिव्यभोगान् जनानां । इति पतितशरण्यं त्वां
प्रपन्नोऽस्मि मातर् ललिततरतरङ्गे चारु गङ्गे प्रसीद ॥७॥ शुभतरकृतयोगाद्विश्वनाथ
प्रसादाद् भवहरवरविद्यां प्राप्य काश्यां हि गङ्गे । भगवति तव तीरे नीरसारं निपीय
मुदितहृदयकञ्जे नंदसूनुं भजेऽहं ॥८॥ गंगाष्टकमिदं कृत्वा भुक्तिमुक्तिप्रदं नृणां । सत्य
ज्ञानानंदतीर्थयतिना स्वर्पितं शिवे ॥९॥ तेन प्रीणातु भगवान् शिवो गंगाधरो विभुः
करोतु शंकरः काश्यां जनानां सन्ततं शिवं ॥१०॥ इति सत्यज्ञानानंदतीर्थयतिना
विरचितं गंगाष्टकं सम्पूर्णम् ॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative